**आदौ-मुख्यवार्ता:**

- **जम्मू कश्मीर हरियाणा राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं सजवं प्रवर्तते।**
- **वाणिज्य-उद्योगमन्त्रालयेन उक्तं यत् उपभोक्तृभ्यः समुचितमूल्ये पलाण्डोः उपलब्धतां सुनेश्चेतुं प्रशासनं नूतन-रणनीतिं स्वीकुर्वत् अस्ति।**
- **द्विसहस्राधिकचतुःविंशतितमवर्षस्य इफ्फी इत्यनेन अर्थात् सर्वश्रेष्ठ-पदार्पण-भारतीय- चलचित्र अनुभागः इति नामकः नूतनः प्रभागः प्रारब्धः ।**
- **पञ्चचत्वारिंशततमं फिडे शतरंज ओलंपियाड प्रतिस्पर्धायां भारतस्य महिला शतरंज दलेन हंगरी देशे स्विट्जरलैंड दलं त्रि-एक इति अङ्कान्तरालेन पराजितम्।**

**जम्मू-कश्मीर-हरियाणा निर्वाचन**

जम्मू-कश्मीर हरियाणा राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं सजवं प्रवर्तते। प्रधानमन्त्रीनरेन्द्रमोदी अद्य जम्मू-कश्मीरस्य डोडा क्षेत्रे एकां नैर्वाचनिक-जनसभां सम्बोधितवान् । तत्र असौ विपक्षि दलानि आलोचयन् प्रोक्तवान् यत् जम्मू-कश्मीरोयम् अधुना विकासस्य नवीनां गाथां लिखति। श्रीमोदी अवदत् यत् निर्वाचनमिदं जम्मू-कश्मीरस्य भाग्यं निर्धारणं करिष्यति। सममेव एकस्य सुरक्षित-क्षेत्रस्य अपि निर्माणं करिष्यति। जम्मू-कश्मीरे विधानसभा-निर्वाचनस्य प्रथमचरणाय चतुर्विंशतिः विधानसभासनेभ्यः मतदानम् अस्य मासस्य अष्टादश दिनांके भविष्यति। अस्मिन्नेव क्रमे हरियाणाप्रदेशे एकस्मिन् एव चरणे विधानसभानिर्वाचनाय प्रचाराभियानं सजवं प्रवर्तते। अस्मिन् प्रदेशे नवतिः आसनेषु विधानसभानिर्वाचनाय मतदानं अक्टूबर मासस्य पञ्च दिनांके भविष्यति।

**वाणिज्य-उद्योग मन्त्रालय**

वाणिज्य-उद्योगमन्त्रालयेन उक्तं यत् उपभोक्तृभ्यः समुचितमूल्ये पलाण्डोः उपलब्धतां सुनेश्चेतुं प्रशासनं नूतन-रणनीतिं स्वीकुर्वत् अस्ति। वर्धमानानाम् आवश्कता -आपूर्ति-स्थितीनां मूल्य-प्रवृत्तीनां च आधारेण पलाण्डोः लक्षितां स्थिरां च आपूर्तिं सुनेश्चेतुं राज्यसर्वकारैः सह सम्मिल्य कार्यं क्रियते ।

अस्य मासस्य पञ्च दिनाङ्के मोबाइल-वैन्-इत्यत्र पञ्चत्रिंशत् रूप्यकाणां प्रतिकिलोग्राम-मितेन उचित-मूल्येन पलाण्डोः विक्रयः आरब्धः । दिल्ली, मुम्बई, चेन्नई चेति नगरेषु विक्रयः आरब्धः।आगामिषु दिनेषु हैदराबाद- बेङ्गलूरु, कोलकाता इत्यादि-नगराणि समेत्य सर्वेषु राज्यराजधानीषु अपि पलाण्डोः विक्रयणं विस्तारितं भविष्यति।

**इफ्फी-2024**

युव-चलच्चित्र-निर्मातृणांकृतेद्विसहस्राधिकचतु:विंशतितम वर्षस्य भारतीयान्ताराष्ट्रियचल-च्चित्रमहोत्सवः इत्यनेन "Best Debut Indian Film Section अर्थात् सर्वश्रेष्ठ-पदार्पण-भारतीय- चलचित्र अनुभागः इति नामकः नूतनः प्रभागः प्रारब्धः । पञ्च-पञ्चाशततमः इफ्फी गोवानगरे नवम्बर-मासस्य विंशति दिनांकतः अष्टाविंशतिः दिनांक-पर्यन्तं प्रचलिष्यति। अनेन प्रभागमाध्यमेन इफ्फी देशस्य विभिन्नानि आख्यानानि, चलचित्र शैलीनां च प्रदर्शयन्तः भारतीयपदार्पणचलच्चित्रेषु अपि केन्द्रीभवति।

एतानि चयनानि यूनां चलच्चित्रनिर्मातृणां रचनात्मक-दृष्टिं अद्वितीयकथा-कथनपद्धतिं च प्रकाशयिष्यन्ति, नूतनप्रतिभां मञ्चं प्रदास्यन्ति, उदयमान-निर्देशकानां कार्यं च प्रदर्शयिष्यन्ति। सर्वोत्तम-पदार्पण-भारतीयचलच्चित्रविभागे सर्वोत्तमानि पञ्च प्रथमं चलच्चित्राणि चित्वा तेषां प्रदर्शनं च भविष्यति। "Best Debut Indian Film Section" इत्यस्य प्रविष्टयः अधुना उद्घाटिताः सन्ति, समापनतिथिः सितम्बरमासस्य त्रयोविंशतिः अस्ति।

**विरामः**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

**प्रधानमंत्री-अनुग्रह राशि**

प्रधानमंत्री नरेंद्र मोदी गुजरातस्य देहगाम क्षेत्रे निमज्जितानां जनानां मृत्यो: संदर्भे दु:खं प्रकटितवान्। श्री मोदिना पीडितानां कृते अनुग्रह राशे: अपि घोषणा कृता। एकस्मिन् सामाजिकान्तर्जालीय पटले प्रधानमन्त्रिणा समुदीरितं यत् प्रधानमंत्री राष्ट्रिय आपद् उद्धार कोषात् प्रत्येकस्य मृतकस्य परिजनेभ्य: द्विलक्ष रूप्यकाणां अनुग्रह राशि: प्रदास्यते। व्रणितेभ्य: पंचाशत् सहस्त्र रूप्यकाणि प्रदास्यन्ते।

**जम्मू कश्मीर**

अद्य प्रात: उत्तरीय-कश्मीरस्य बारामूला जनपदस्य क्रेरी क्षेत्रे संघर्षे त्रय: आतंकवादिन: मारिता:। आरक्षिबलानुसारं क्रेरी क्षेत्रस्य चाक-ए-तपर इत्यत्र सुरक्षा बलै: साकं आतंकवादिनां मध्ये संघर्षावधौ आतंकवादिन: मृत्युमुपगता:। मृतकानां आतंकवादिनां सम्प्रति अभिज्ञानान्वेषणकार्यं प्रचलति।

**कांग्रेस**

कांग्रेसदलस्याध्यक्ष: मल्लिकार्जुन खड़गे हरियाणायां आगामीविधानसभा निर्वाचनाय अद्य दलस्य त्रिवरिष्ठ नेतॄन् एआईसीसी इत्यस्य कृते वरिष्ठ पर्यवेक्षकत्वेन नियुक्तवान्। ते च सन्ति- अशोक गहलोत: अजयमाकन प्रतापसिंहश्च।

## मौसम

भारतीयऋतुविज्ञानविभागेन अद्य पश्चिम बंगालस्य गङ्गायाः तटीय क्षेत्रेषु, अद्य ओडिशा झारखंडयो अतिवृष्टेः अनुमानं कृतम्। आगामी द्विदिवसं यावत् छत्तीसगढ़े पूर्वी मध्य प्रदेशे च अतिवृष्टेः संभावना वर्तते। ऋतुविज्ञानविभागेन अग्रिमेषु अष्ट-चत्वारिंशत् होरासु अरूणाचलप्रदेश, उप-हिमालयी पश्चिम बंगाल, सिक्किम, बिहार, उत्तर प्रदेश, नागालैंड, मणिपुर, मिजोरम, त्रिपुरा, असम, मेघालय चेति प्रदेशे अति वृष्टिः अनुमानितम्।

## हिन्दी दिवस

प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः, रक्षामन्त्री राजनाथसिंहः च हिन्दीदिवसावसरे देशवासिनां कृते शुभकामनाः प्रदत्तवन्तः। श्रीमोदी हिन्दीभाषायाः महत्त्वस्य विषये एकं दृश्य- श्रव्य लघुचलचित्र सन्देशं अन्तर्जालीयमाध्यमेन प्रख्यापितवान्। गृहमन्त्री अमितशाहः स्वसन्देशे उक्तवान् यत् राजभाषाविभागः शीघ्रमेव अष्टमी सूच्यां समाविष्टानां सर्वासु भाषासु हिन्दीभाषायाः अनुवादार्थं एकं अन्तर्जालीय तन्त्रांशं प्रारभते । अनेन अत्यल्पे काले आर्टिफिशियल इन्टेलिजेन्स् इत्यस्य माध्यमेन सर्वासु भाषासु पत्राणि भाषणानि च अनुवादिताः भविष्यन्ति।

रक्षामन्त्री राजनाथसिंहः अपि देशे विदेशे च हिन्दीभाषायाः राजभाषारूपेण स्वीकरणस्य महत्त्वस्य विषये एकं दृश्य-श्रव्य माध्यमेन लघुसन्देशं प्रख्यापितवान् । अस्मिन् अवसरे केन्द्रीयगृहमन्त्री अमितशाहः अवदत् यत् देशस्य एकतायै हिन्दीभाषायाः अद्वितीया भूमिका अस्ति। असौ अवदत् यत् हिन्दीभाषायां अपि च अन्यभाषासु स्पर्धा नास्ति। अद्य नवदिल्ल्यां राजभाषा हीरकजयन्ती उत्सवे चतुर्थस्य अखिलभारतीय राजभाषासम्मेलनस्य उद्घाटनसत्रे च सम्बोधयन् श्री शाहः अवदत् यत् सर्वासु भाषासु सुदृढीकरणेन एव सशक्तं राष्ट्रं निर्मातुं शक्यते। सः अवदत् यत् राष्ट्रियशिक्षानीतौ बालकाः स्वमातृभाषायां शिक्षां प्राप्नुयुः इति सुनिश्चित्य विशेषं बलं दत्तम् अस्ति।

## बासमती

केंद्र प्रशासनेन बासमती व्रीहेः निर्यातं इतोपि वर्धनाय निर्यातस्य न्यूतनतमं शुल्कं अपाकरणस्य निर्णयो विहितम्। पदक्षेपोऽयं व्यापारस्य विषये चिंता, व्रीहेः च पर्याप्त गृहोत्पादकोपलब्धताः सुनिश्चितं करिष्यति।

## झारखंड करम पर्व

झारखंडे करम पर्व अशेषे हि राज्ये धार्मिकोत्साहेन हर्षेण च आमान्यते। पर्व इदं झारखंडस्य सर्वाधिक लोकप्रिय उत्सवेषु अन्यतमं वर्तते। इदं पर्व सस्येन सह संबद्धः अस्ति। सममेव करम वृक्षं प्रति श्रद्धांजलित्वेन कार्यं करोति। वृक्षोऽयं उर्वरतायाः, समृद्धेः शुभस्य च प्रतीकमस्ति।

## आंध्र-नायडू

आंध्र प्रदेशे, केंद्रीय नागरिक उड्डयन मंत्री के. राममोहन नायडू: अद्य विजयवाडाया: गन्नवरमविमान स्थानके परियोजनानां उद्घाटनं अकरोत्। यस्योद्देश्यं क्षेत्रस्य विमानन मूलसंरचाया: वर्धनं वर्तते। असौ विजयवाड़ा विमानस्थानकाय नूतन मार्गस्य उद्घाटनं अकरोत्, येन यात्रिणां प्रापणे उल्लेखनीय परिष्कारस्य विश्वासो वर्तते। श्री नायडूवर्येण विजयवाड़ा अथ नई दिल्ली मध्ये एका नूतन इंडिगो उड्डयन सेवा अपि आरब्धा। येन राष्ट्रीय राजधान्या सह विमानसंपर्क: वर्धित:।

## कृषि-राज्य मन्त्री

कृषिराज्यमन्त्री रामनाथठाकुरः उक्तवान् यत् भारतं खाद्यसुरक्षां पोषणं च विधाय विश्वस्य बृहत्तमं खाद्याधारितं सुरक्षाकार्यक्रमं कार्यान्वितं करोति। अद्य ब्राजीलस्य क्यूबानगरे जी-विंशतिः समवायस्य कृषिमन्त्रिणाम् उपवेशने श्रीठाकुरः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य नेतृत्वे भारतं कृषिविकासाय प्राधान्यं ददाति। सः अवदत् यत् भारतस्य दृष्टिः न केवलं उत्पादकतायाम् अपितु आर्थिकसामाजिक-पर्यावरण-स्थायित्वं सुनेश्चेतुं कृषकाणां समृद्धिं वर्धयितुं विकासस्य व्यापकदृष्टिकोणं च केन्द्रीकर्तुं वर्तते।

## शतरंज

पञ्चचत्वारिंशततमं फिडे शतरंज ओलंपियाड प्रतिस्पर्धायां भारतस्य महिला शतरंज दलेन हंगरी देशे स्विट्जरलैंड दलं त्रि-एक इति अङ्कान्तरालेन पराजितम्।